International Journal of Sanskrit Research 2024; 10(3): 314-319

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 314-319
© 2024 IJSR
www.anantaajournal.com
Received: 07-03-2024
Accepted: 10-04-2024

डॉ. एकराजपौडेलः
सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, उत्तर प्रदेश, भारत

**Corresponding Author:**
डॉ. एकराजपौडेलः
सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, उत्तर प्रदेश, भारत

# व्यक्ताव्यक्तज्ञानां कार्यरूपेणाभिव्यक्तिनिरूपणम्

डॉ. एकराजपौडेलः

## प्रस्तावना

चैतन्यरूपस्य परब्रह्मणो जगद्रूपेणाभिव्यक्तौ सूक्ष्मावस्थातः स्थूलावस्थारूपाऽवस्थितिर्भवति । तत्र परब्रह्म परमं चैतन्यं वर्तते। तस्यैव कार्यरूपा पृथ्वी चेतनजन्या सती सचेतनाऽपि जडत्वेनावगृह्यते। तत्र जड पदार्थेषु परमं जडवस्तु पृथ्वी वर्तते। एवञ्च परब्रह्मणः समुत्पन्नेषु महदादिषु पृथिवीपर्यन्तेषु क्रमश श्चेतनांशः क्षीणत्वेना- वतरति । पृथिव्यादिषु महत्तत्त्वपर्यन्तेषु चेतनांशोऽधिकरूपेणावतिष्ठते। अतः परब्रह्म परमचेतनं तत्त्वं वर्तते। तदितराणि प्रकृतिमहदद् ङ्कारमनआकाशवायुतेजोजलपृथ्वीरूपाणि तत्त्वानि अनुद्भूतानुद्भूततरानुद् भूततमचेतनानि वर्तन्ते। जडात्मकेषु पृथ्वीजलाग्निवाय्वाकाशेषु यचिन्मयं तन्मात्रात्मकं तत्त्वं वर्तते तद् गन्धरसरूपस्पर्शशब्दरूपेणावतिष्ठते। तत्रापि जडतमस्य तन्मात्रात्मकं यत्तत्त्वं वर्तते तज्जडतरेषु नाभिव्याप्नोति । जडतमजडतरयोश्च तत्त्वं जडात्मके तदल्पजडेऽल्पतरजडेऽल्पतमजडेषु च नाभिव्याप्नोति। व्याप्तचेतनस्य तन्मात्रात्मकं तत्त्वं तु जडेष्ववतिष्ठत एव। अतः शब्दादीनि तन्मात्राणि आकाशादिपृथिव्यन्तेषु वर्तन्ते किन्तु गन्धादीनि तन्मात्राणि पृथिव्याद्यतिरिक्तेषु न सन्ति। अतो वक्तुं शक्यते- शब्दस्पर्शरूपरसगन्धवती पृथिवी। शब्दस्पर्शरूपरसवज्जलम्। शब्दस्पर्शरूपवानग्निः। शब्दस्पर्शवान् वायुः। शब्दवान् आकाश: इति। तथा च सर्वेषां निष्कृष्टलक्षणं यथा- तत्र शब्दस्पर्शरूपरसवत्त्वे सति गन्धवत्त्वं पृथिव्या लक्षणम्। गन्धरहितत्वे सति शब्दस्पर्शरूपरसवत्त्वं जलस्य लक्षणम्। गन्धरसरहितत्वे सति शब्दस्पर्शरूपवत्त्वं तेजसो लक्षणम्। गन्धरसरूपरहितत्वे सति शब्दस्पर्शवत्त्वं वायोर्लक्षणम्। गन्धरसरूपस्पर्शरहितत्वे सति शब्दवत्त्वमाकाशस्य लक्षणमिति।

पृथिव्यादीनां क्रमशो दशगुणोत्तरवृद्धिमत्त्वात् सर्वेषां पूर्वपूर्वपदार्थानामुत्तरोत्तरपदार्थाः कारणरूपा आश्रयरूपाश्च भवन्ति । अतः पृथ्व्या जलम्, जलस्याग्निः, अग्नेर्वायुः, वायोराकाशश्चाश्रयरूपा वर्तन्ते। तथा चाह श्रीमद्भागवते-

विकारैः सहितो युक्तैर्विशेषादिभिरावृतः।
आण्डकोषो बहिरयं पञ्चाशत्कोटिविस्तृतः।।
दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत्।
लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः।।
तदाहुरक्षरं ब्रह्म सर्वकारणकारणम्।
विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मनः।।
(भा•3.11.39-41) इति।

अथाकाशोत्तराणां व्यापकानां किन्तु सूक्ष्मरूपत्वाददृश्यानां मनोऽहङ्कारमहतां प्रकृतेश्च स्वरूपमुपवर्ण्यते। यथा पृथिव्यादीनां जलादय आकाशान्ता: पदार्थाः कारणरूपा भवन्तीति कथितं तथैवाकाशादीनामपि ये कारणरूपा वर्तन्ते ते क्रमशो मनोऽहङ्कारमहत्प्रकृतिरूपाः पदार्था वर्तन्ते। अतो वक्तुं शक्यते मनआदीनां लक्षणम्- चैतन्याश्रिताऽहङ्कारजन्यत्वे सति गन्धरसरूपस्पर्शशब्दाश्रयत्वं मनसो लक्षणम्। चैतन्याश्रितमहज्जन्यत्वे सति गन्धरसरूपस्पर्शशब्दमनआश्रयत्वमहङ्कारलक्षणम्। चैतन्याश्रितप्रकृतिजन्यत्वे सति गन्धरसरूपस्पर्शशब्दमनोऽहङ्काराश्रयत्वं बुद्धेर्लक्षणम्। चैतन्याश्रितत्वे सति गन्धरसरूपस्पर्शशब्दमनोऽहङ्कारबुद्ध्याश्रयत्वं प्रकृतेर्लक्षणम्। तथा चाऽन्ते स्वतः प्रकाशत्वे सति गन्धरसरूपस्पर्शशब्दमनोऽहङ्कारबुद्धिप्रकृत्याश्रयत्वं आत्मनो लक्षणम्।

अथ पृथिव्यादीनां चेतनसम्मिश्रगतेर्निरूपणं क्रियते- जगति व्यक्ताव्यक्तरूपेण स्थिता: पदार्थाः सदसदुभयात्मका विराजन्ते । तत्र व्यक्ता आकाशवायुतेजोऽग्निजलपृथिवीरूपा: पदार्थाः स्थूल-स्थूलतर-स्थूलतम-अतिस्थूलातिस्थूलतररूपेणोत्तरोत्तरमभिव्यक्ता भवन्ति । अव्यक्ताश्चानुभवगम्या: पदार्था: गन्धरसरूपस्पर्शशब्दाख्यास्तन्मात्ररूपाः, मनोबुद्धिचित्ताऽहङ्काररूपान्तःकरणचतुष्टयरूपाः, प्रकृतिपुरुषाभिन्नौ मायामाधवौ चेति। व्यक्तपदार्था द्रव्यरूपाः, कारणधर्मसंयुक्ताः, आश्रयरूपाः, स्थौल्यवन्तः, मूर्तिमन्तः, शरीरवन्तश्च विद्यन्ते। तेषां सत्त्वं साक्षादनुभवगम्येन्द्रियग्राह्यरूपत्वादसत्त्वं तु प्रतिक्षणविपरिणामशालित्वादस्थिरत्वादध्रुवत्वाच्च। अव्यक्तपदार्थाः स्थिररूपाः, परपदार्थेनासंसृष्टाः, ध्रुवाः,अविचाल्याः, गतिमन्तोऽप्येकरूपाः, अन्तर्यामिणः, नित्याश्च वर्तन्ते। कार्यरूपा जन्या: पदार्था व्याप्या भवन्ति, कारणरूपा जनका: पदार्था व्यापका भवन्ति। अमूर्तिमतामव्यक्तपदार्थानां व्याप्यव्यापकत्वं कालाभिन्नमात्रात्मकगतिशक्तिकृतम्। व्यक्तानामाकाशादिमहाभूतानां तु परिमाणकृतमेव।

व्यक्तेषु महाभूतेषु या नित्यत्वप्रत्यायिका सत्ताऽस्ति साऽव्यक्तरूपनित्यपदार्थानां शब्दतन्मात्रादीनां संसर्गकृता। तेषामुत्पत्तिक्रमश्चेत्थम्- अव्यक्ता नित्या प्रकृतिर्महत्तत्वं जनयति, ततोऽहङ्कारजन्म भवति, सात्विकाहङ्कारादिन्द्रियाधिष्ठातारो देवा मनश्च जायन्ते, राजसाहङ्काराद् दशेन्द्रियाणि जायन्ते। तामसाहङ्कारात् सूक्ष्मपञ्चभूतानि जायन्ते। सूक्ष्मपञ्चभूतानि च तन्मात्ररूपाणि।

तथा चोक्तं श्रीमद्भागवतमहापुराणे-

आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम्।
यदा विवेकनिपुणा आदौ कृतयुगेऽयुगे॥ २॥

तन्मायाफलरूपेण केवलं निर्विकल्पितम्। वाङ्मनोगोचरं सत्यं द्विधा समभवद्बृहत्॥ ३॥
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका। ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते॥ ४॥
तमो रजः सत्त्वमिति प्रकृतेरभवन् गुणाः। मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च॥ ५॥
तेभ्यः समभवत्सूत्रं महान् सूत्रेण संयुतः। ततो विकुर्वतो जातोऽहङ्कारो यो विमोहनः॥ ६॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत्। तन्मात्रेन्द्रियमनसां कारणं चिदचिन्मयः॥ ७॥ अर्थस्तन्मात्रिकाज्जज्ञे तामसादिन्द्रियाणि च। तैजसाद्देवता आसन्नेकादश च वैकृतात्॥ ८॥

मया सञ्चोदिता भावाः सर्वे संहत्यकारिणः।
अण्डमुत्पादयामासुर्ममायतनमुत्तमम्॥ ९॥
(भा.11.24.2-9)इति।

वेदान्तसारे चोक्तम्- "इमान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते । एतेभ्य: सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते। (वेदान्त- सार 26) इति। तट्टीका यथा - नन्वव्याकृतात् पञ्चतन्मात्राणि क्रमेण जायन्ते इति हि स्मृतीतिहासपुराणेषु प्रसिद्धिस्तत्कथमाकाशादेरिहोत्पत्तिराम्नायते इति तत्राह- एतान्येवेति । एतान्येवाकाशादीनि सूक्ष्मभूतानि व्यवहार्यमाणानि शब्दादितावन्मात्रैकस्वभावानि अपञ्चीकृतानि परमसंसृष्टानि चेति स्मृत्यादिषूच्यन्ते महर्षिभिरित्यर्थः। इति विद्वन्मनोरजनी। (शब्दकल्पद्रूमे तन्मात्रमित्यत्र) इति। तामसाहङ्कारान्महाभूतानामादिकारणात्तन्मात्रोत्पत्तिर्विष्णुपुराणे चोक्ता –

भूतादिस्तु विकुर्वाणः सर्गं तन्मात्रिकं ततः। ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम्॥ (वि.पु. १२) इति।

तत्क्रमश्चेत्थम्- अव्यक्तात्तामसादहङ्कारादव्यक्तं शब्दतन्मात्रं जायते, शब्दतन्मात्राच्छब्दगुणको व्यक्त आकाशो जायते। शब्दतन्मात्रजन्यादाकाशात् स्पर्शतन्मात्रं जायते। स्पर्शतन्मात्रतः स्पर्शगुणो वायुर्जायते। तत्र वायौ स्पर्शतन्मात्रं शब्दश्च विद्येते। तन्मात्राणां परैरसंसृष्टस्वभावात्तेषां तदेव रूपत्वं सैव मात्रा यस्य वेति रूपत्वम्। शब्दस्पर्शगुणसहितात् स्पर्शतन्मात्रजन्याद् वायुतो रूपतन्मात्रं जायते। रूपतन्मात्रतो रूपगुणं तेजो जायते। अत्रापि रूपतन्मात्रं शुद्धमेकरूपञ्च भवति । रूपतन्मात्रजन्ये तेजसि शब्दस्पर्शगुणाभ्यां सह रूपगुणश्च वर्तते। शब्दस्पर्शरूपगुणसहिताद् रूपतन्मात्रजन्यात्तेजसो रसतन्मात्रं जायते। रसतन्मात्रं रसमात्राधिष्ठानं शुद्धं स्वतन्त्रं तत्त्वं वर्तते। ततो जलात्मकं शब्दस्पर्शरूपरसगुणयुक्तं प्रतीयमानं मूर्तिमज्जलतत्त्वं जायते। शब्दस्पर्शरूपरसगुणसहिताद् रसतन्मात्रजन्याज्जलाद् गन्धतन्मात्रं जायते। गन्धतन्मात्रतश्च पूर्ववत् पृथिवी जायते। तत्र गन्धतन्मात्रं पदार्थान्तरसम्बन्धरहितं शुद्धं स्वतन्त्रं तत्त्वं वर्तते। किन्तु गन्धतन्मात्रजन्ये महाभूतरूपे द्रव्यात्मके पृथिवीतत्त्वे शब्दादयः पञ्चगुणाः वर्तन्ते। प्रतीयमाने महाभूतात्मके तत्त्वे मुख्यं कारणरूपं चाकाशतत्त्वमेवास्ति।

तत्र यथा ब्रह्म तथैव जगच्च नित्यस्वरूपमेवास्ति।

नित्यत्वं द्विविधं भवति। प्रवाहवन्नित्यत्वम्, कूटस्थनित्यत्वञ्चेतिरूपम्। तत्र परब्रह्म कूटस्थवन्नित्यं वर्तते। जगत्तु प्रवाहवन्नित्यं वर्तते। यथा गाङ्गं विग्रहं निरन्तरं हिमवतः समुद्रं यावन्निरन्तरं चलदेकरूपं नित्यञ्च वर्तते तथैव प्रकृतिरपि निरन्तरचलायमाना वर्तते। गच्छतीति जगदिति विग्रहात् संसरणशीलस्य जगत एव संसार इति सञ्ज्ञा । तत्र चलायमाना गतिः सर्वतत्त्वेषु वर्तते किन्तु चलायमानगत्यैव प्रतीयमाना ये पदार्था वर्तन्ते ते महाभूतत्वेनोच्यन्ते। महाभूतेषु प्रवाहकृता सत्तैव वर्तते किन्तु तेषां कारणरूपाणि तन्मात्राणि कूटस्थसत्तावन्ति एव राजन्ते। कूटस्थसत्तावतां सर्वेषां गति: सत्ता वैकरूपा वर्तते, किन्तु प्रवाहत: प्रतीयमानानां महाभूतानां गतिः स्थितिर्वाऽनेकरूपाऽस्ति । यथा एकं रज्जुखण्डं दण्डं वा वृत्ताकारेण भ्रामणे चक्रमिव प्रतीयते तथैव महाभूतान्यपि तत्तत्तन्मात्रकृतसत्तयैव प्रतीयमानानि भवन्ति। शब्दादितन्मात्राणां स्वाभाविकनित्यगतिकत्वात् तेषां सत्त्वे महाभूतानां सत्ता प्रतीयते। तन्मात्राणां स्वकारणे लये सति महाभूतानामपि सत्ता विनश्यति। पृथिव्यादीनि पञ्चभूतानि मृद्विकारघटाकृतिवद्रूपवन्ति भवन्ति । यथा एकस्मिन् घटे नष्टेऽपि घटत्वं घटसत्ता च न नश्यते तद्वत् तन्मात्राणां स्वकारणे लये पृथिव्यादीनां सत्ता पृथिवीत्वं वा न विलुप्यते। यथा भूमावुप्तं बीजं जलसिक्तं सद् वृक्षत्वं समायाति। एवं च वृक्षस्थकाष्ठे भस्मरूपः पृथ्व्या अंशो दृश्यते तद्वद्रसतन्मात्रजन्याज्जलाद् गन्धतन्मात्रस्य ततः पृथ्व्या: सम्भवः सम्भवति। अपि च यथा सामुद्रे जले निक्षिप्तं मृत्पीण्डं जलेन सह मिश्रितं सत् तत्रैव लीनं भवति तथैव तत्तत्तन्मात्राणां स्वकारणे लयो भवति। यथोद्भवकाले

एकतन्मात्रजन्यपिण्डादन्यस्य तत्तन्मात्ररूपकारणसहितस्य महाभूतस्य चोत्पत्तिर्दर्शनं वा भवति तद्वल्लयकालेऽपि पृथ्वीखण्डस्य गन्धतन्मात्रे लयो भवति, ततोऽन्तरं जलस्य रसतन्मात्रे लयानन्तरं गन्धतन्मात्रस्य रसतन्मात्रे लयो भवति। इत्थं महाभूतानां सर्वेषां स्वकारणे तन्मात्रे लयो भवति। गन्धादितन्मात्राणां च रसादितन्मात्रे लयो भवति।

शब्दतन्मात्रादीनां यदा विषमा गतिर्भवति तदा जगतः स्थितिर्भवति। यदा सर्वेषां गतिः समाना भवति तदा प्रलयो भवति। तत्र जगतः स्थितिकाले केषां कतिमात्रागतिर्भवतीति निरूप्यते - ब्रह्माण्डे सप्तावरणानि विद्यन्ते। तान्यावरणानि च प्रत्येकं दशगुणितविस्तृतानि गतिशक्तिमन्ति विद्यन्ते। अत उक्तं श्रीमद्भागवतमहापुराणे-

"दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत्।
लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः॥" (भा.3.11.41) इति।

"अण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते।
वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः॥"

(2.1.25) इति च। विस्तृतेष्वेतेषु पृथिवीत उत्तरोत्तरं जलादौ दशगुणिताऽधिका गतिर्विद्यते। पृथिवीतो जलेऽधिका गतिः, जलादग्नेरग्नेर्वायोर्वायोराकाशस्याऽऽकाशान्महतो महतः प्रकृतेर्गतिरुत्तरोत्तरं वृद्धिमती विद्यते। अतः पृथ्वी स्थिराऽस्ति। जलं चलायमानं वर्तते। अग्निश्चलायमानतरो वर्तते। वायुश्चलायमानतमो वर्तते। आकाशोऽतिचलायमानतमस्ततो महत्, ततः प्रकृतिश्च निरतिशयगतिमती विद्यते। सर्वेषां गतिमतामाधाररूपो गतिप्रद आत्मतत्त्वरूपः परमात्मैव वर्तते।

अथ तत्त्वानां स्थितिर्निरूप्यते। यथा शरीरान्तर्गतं हस्तपादादिकं तद्भिन्नं तदभिन्नं च वर्तते तथैव प्रकृत्यन्तर्भूतानि तत्त्वानि प्रकृतिरूपाणि पृथक् पृथक् सत्तावन्ति च भवन्ति । महाभूतेष्वपि पृथिवीतो जलस्य जलादग्नेरग्नेर्वायोर्वायोराकाशस्य सत्ता स्थितिर्वोत्तरोत्तरवृद्धिरूपा वर्तते। अतः परिमाणरूपेण तेषां ह्रस्वदीर्घता सिध्यति। अपि च आकाशान्तर्भूतानि वाय्वादिसर्वभूतानि आकाशसत्तयैव सत्तावन्ति भवन्ति। आकाशाभावे स्पर्शरूपरसगन्धगुणानां सत्ता स्थितिर्वा समुपलब्धुं न शक्यते। यथा पाषाणखण्डं मूर्तिकारेण ताड्यमानं सदाकाशदेश एव मूर्तिरूपेण दृश्यते तद्वदाकाशादेव सर्वाणि महाभूतानि प्रतीयन्ते। अत आह महाभारते-

"अग्निमारुततोयानां वर्णाः क्षितितलस्य च।
आकाशादवगृह्यन्ते भिद्यन्तेऽतत्त्वदर्शिभिः॥
(म.भा. शान्तिपर्व. 182.30) इति।

अपि च यत्राकाशसत्ता नास्ति तत्राहङ्कारमय्यां महदात्मिकायां प्रकृतौ तत्त्वे चन्द्रादित्यादीनामपि प्रकाशो व्याप्तुं न प्रभवति। अत आह - " ऊद्ध्र्वं गतेरधस्तात्तु चन्द्रादित्यौ न दृश्यतः। तत्र देवाः स्वयं दीप्ता भास्वराभाग्निवर्चसः॥" (म. भा. शान्ति. 182.24) इति। जगति सदसतोर्विवेचनमेव परमतत्त्वसाक्षात्कारहेतुर्वर्तते। तत्र किं सत्तत्त्वं किञ्चासत्तत्त्वमत्र श्रीमद्भगवद्गीतानुसारं सत्तत्त्वमक्षरतत्त्वरूपेणाऽसत्तत्त्वञ्च क्षरतत्त्वरूपेण ज्ञातुं शक्यते। तदाह- "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्चते॥" (गी. 15.16) इति। अस्य तात्पर्यं वर्तते यत् क्षराऽक्षराख्यौ द्वौ पुरुषावत्र लोके स्तः। तत्र सर्वाणि भूतानि क्षरपुरुषरूपाणि। यः कूटस्थोऽक्षर आत्मा अस्ति सोऽक्षरपुरुषो वर्तते इति। अत्र भूतानां प्रकृतिविकृतित्वेन पुरुषत्वेन कथनमनुचितमिवाभाति तथापि प्रकृतिबद्धस्य पुरुषस्य पञ्चमहाभूतरचितदेहे एवात्मबुद्धित्वात् प्रकृतिबद्धः पञ्चभूतात्मकशरीरेऽहङ्कारवान् पुरुषः क्षरपुरुषत्वेनोच्यते। यश्च आत्मसाक्षात्कारवान् अत आत्मवान् पुरुषो जीवः साक्षात्परमपुरुषो श्रीमन्नारायणश्चाक्षरपुरुषकोटौ समायातः । यथा पञ्चमहाभूतेषु तत्सम्बद्धः पुरुष आत्मानं पञ्चमहाभूताभिन्नं मनुते, अतः क्षरपुरुषत्वेनोच्यते, तथैव पृथिव्यादीनि पञ्चमहाभूतान्यपि यद्यपि गन्धतन्मात्रादिनित्यतत्त्वेनैव निर्मितानि सन्ति तथापि महाभूतत्त्वेन प्रतीयमानानि सन्ति क्षररूपेणोच्यन्ते।

तथा हि यथाऽलातं भ्राम्यमाणं सत् यथार्थचक्रवद्रूपेण प्रतीयते वस्तुतस्तत्रैक एवाङ्गारोऽर्धदग्धकाष्ठो वा भवति तथैव कालगत्या निरन्तरं चलायमानं सद् गन्धतन्मात्रमेव पृथिवीत्वेन, रसतन्मात्रमेव जलत्वेन, रूपतन्मात्रमेवाग्नित्वेन, स्पर्शतन्मात्रमेव वायुत्वेन, शब्दतन्मात्रमेवाऽऽकाशत्वेन परिज्ञायन्ते। वस्तुतः तामसाहङ्काराच्छब्दतन्मात्रं जायते तत्राकाशस्य भानं भवति। अतः परं शब्दगुणसहितात् स्पर्शतन्मात्राद् वायुर्जायते। इत्थं वह्निजलभूमीनां सम्भवश्च तथैव भवति।

तत्राऽऽकाशतत्त्वमपि ब्रह्माभिन्नमेव वर्तते।

अत्र विचारणीयं वर्तते यत्- "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यो महती पृथिवीति। (तै. आरण्यक.2.1) इत्यादिश्रुतिवचनाद् वाय्वग्निजलपृथ्वीनां समुत्पत्तिः क्षरात्मकमहाभूतेभ्य एव भवति किन्तु शब्दतन्मात्रस्य नित्यत्वात् तज्जन्य आकाशोऽपि नित्यो वर्तते। अत उक्तम्- "आकाशस्तल्लिङ्गात्।" (ब्र.सू.1.1.22) इति। यतो हि तामसाहङ्काराज्जायमानं शब्दतन्मात्रं नित्यं तत्त्वं वर्तते। नित्यतत्त्वरूपशब्दतन्मात्राज्जायमान आकाशस्तत्त्वरूपेण नित्यः सन्नपि महाभूतरूपेणानित्यः क्षरश्च वर्तते। महाभूतरूपादनित्यादाकाशाज्जायमानं वायुरूपं महाभूतात्मकं तत्त्वं नित्यात्मकस्पर्शतन्मात्रजन्यं सदपि तस्याकाशजन्यत्वादाकाशदेशे एव प्रतीयमानत्वाच्च तत्र क्षरतरत्वं वर्तते। ततः क्षरतमत्वमग्नौ। ततोऽतिक्षरतमत्वं जले। ततोऽपि पूर्णक्षरतमत्वं पृथ्यां वर्तते। अतो निष्कर्षतः क्षरतत्त्वेषु पृथ्वी-जल-वह्नि-वायु-वियतां गणना समायाति। अक्षरेषु च नित्यतत्वानां पञ्चतन्मात्रसहितानामहङ्कारमहत्प्रकृतिपुरुषाणां गणना समायाति। अत्र क्षरत्वम्- अलातचक्रवत् प्रतीयमानत्वम्। अक्षरत्वम्- अर्धदग्धकाष्ठात्मकस्वरूपवत्त्वम्। अतो वक्तुं शक्यते यत्- "अनादिमत् परं ब्रह्म न तत्सन्नासदुच्यते।" (गी 13.12) इतिवचनात् सर्वं जगदिदं ब्रह्मैव। अत्र प्रतीयमानानि क्षररूपाणि सत्तारूपेण प्रतीयमानान्येव महाभूतान्यसद्रूपाणि। एतेषु कूटस्थनित्यताऽभावेऽपि प्रवाहनित्यता निर्बाधैव। महाभूतातिरिक्तं कूटस्थं प्रकृतेस्तत्त्वं तत्कारणं परब्रह्म च सत् इति। तत्र महाभूतानां कारणरूपत्वात् सर्वेषां वाचकरूपेण स्थितस्य शब्दस्याश्रयरूपत्वाद् ब्रह्माभिन्नशब्दतत्त्वाश्रयरूपत्वाच्चाकाशः परमात्मनः स्वरूपं तल्लिङ्गञ्च वर्तत इति सिद्धम्। एतेनाव्यक्तानां नित्यानां तत्त्वानां व्यक्तानां महाभूतानां ज्ञातुः पुरुषस्य चाश्रयरूप आकाश एव सृष्टिस्थितिलयानां स्थानमाश्रयश्चेति निर्विवादम्।

## सङ्केताक्षरसूची

1. श्रीमद्भगवद्गीता (गी०)
2. ब्रह्मसूत्रम् (ब्र.सू.)
3. श्रीमद्भागवतम् (भा०)
4. विष्णुपुराणम् (वि०पु०)
5. महाभारतम् (म० भा०)
6. वाक्यपदीयं ब्रह्मकाण्डम् (वा०प०३०)
7. तैत्तरीयम् आरण्यकम् (तै० आ०)
8. वेदान्तसारः (वे० सा०)
9. वाक्यपदीय ब्रह्मकाण्डम् (वा०प०३०)

## सन्दर्भग्रन्थसूची


1. वेदान्तसारः,- श्रीसदानन्दविरचितः, भावबोधिनी' संस्कृत-हिन्दीव्याख्योपेतः, व्याख्याकार:
2. मुरादावादस्थ के० जी० के० कालेजप्रोपगुध्यायः श्री रामशरणत्रिपाठी शास्त्री एम. ए., काव्यतीर्थः, चौखम्बा विद्याभवन, वाराणासी-१, १६६५
3. शब्दकल्पद्रूमकोषः, स्यार-राजा-राधाकान्तदेव-बहादुरेण विरचितः, ऐप्लिकेशननिर्माणम्- श्रुतिझा, प्रो. मदनमोहनझा, Google Play पर ऐप्लिकेशन।
4. तर्कसंग्रहः- श्रीमदन्नंभट्टविरचितः, श्रीकृष्णदासात्मजेन गंगाविष्णुना स्वकीय "लक्ष्मीवेंकटेश्वर " मुद्रणागारे मुद्रयित्वा प्रकाशितः,
5. कल्याण-मुंबई, संवत् १९५४, शके १८१९
6. न्यायसिद्धान्तमुक्तावली- श्रीविश्वनाथपञ्चाननभट्टाचार्येण विरचिता,

काशीनिवासिनिर्मल पं०स्वामिगोविन्दसिंहसाधुकृतार्यभाषाटीकोपना तेनैवसंशोधिता, "श्रीवेङ्कटेश्वर" नाम्नि मुद्रणयन्त्रे मुद्रयित्वा प्रकाशिता, संवत् १९५७, शके १८२२

7. साङ्ख्यकारिका- महामुनीश्वरकृष्णविरचिता, साङ्ख्यतत्त्वकौमुद्या विभूषिता, गयायां स्वाम्यात्मस्वरूपोदासीनैः श्रीरामामुद्रणयन्त्रालये मुद्रयित्वा प्रकाशिता, शके १८५२, संवत् १९८७.
8. श्रीमद्भागवतमहापुराणम्- महर्षिवेदव्यासः, हिन्दी अनुवादसहितम्, गीताप्रेस, गोरखपुरम्, वि. सन् 2065
9. विष्णुपुराणम्- महर्षिः पराशरः, हिन्दी अनुवादसहितम्, गीताप्रेस, गोरखपुरम्, वि. सं. 2062
10. श्रीमद्भगवद्गीता- महर्षिवेदव्यासः मूत्रमात्रम् गीताप्रेस गोरखपुरम्, वि. सन् २०७४
11. महाभारतम् - महर्षिवेदव्यासः, पद्मभूषण डॉ. पं. श्रीपाददामोदर सातवलेकर, भारतमुद्रणालय, बलसार गुजरातम्, वि. सं. २०४१
12. शुक्लयजुर्वेदसंहिता, सं.पं. ईश्वरचन्द्रः, परिमल पब्लिकेशन, नई दिल्ली २००४
13. वाक्यपदीयम्- महाराजभर्तृहरिः, सं. पद्मश्री रघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, सन् २०५६
14. ब्रह्मसूत्रम्- महर्षिबादरायणः, शाङ्करभाष्यम्, अप्पय्यदीक्षितः,अमलानन्दः, वाचस्पतिभिर्व्याख्यातम्, सं. श्रीवासुदेवशर्मा, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, ई.सन् २००२
15. व्याकरणमहाभाष्यम्- पतञ्जलिः, प्रदीपोद्योतसहितम्, सं. श्रीगुरुप्रसाद शास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, ई. सन् २००६
16. अमरकोषः- अमरसिंहः, भानूजिदीक्षितस्य रामाश्रमीसुधाटीका, चौखम्बा संस्कृत प्रतिष्ठानम्, नई दिल्ली, ई. सन् २०१७ युधिष्ठिरमीमांसकः, रामलालकपूरट्रस्टम्, हरियाणा,
17. पाणिनीयाष्टाध्यायी- पाणिनिः, काशिका, न्यास-पदमञ्जरी-भावबोधिनी सहिता, सं. डॉ. जयशङ्करलालत्रिपाठी, डॉ. सुधामालवीयश्च, तारा प्रिन्टिंग वर्क्स कामाख्या वाराणसी, सन् २०४२
18. वेदार्थसङ्ग्रहः - श्रीरामानुजाचार्यः, सं. एम् ए. लक्ष्मीताताचार्यः, संस्कृतसंशोधनसंसद्, मैलकोटे, वि. सं. १९९१
19. वैयाकरणभूषणसारः- भट्टोजिदीक्षितः, व्याख्याकार कौण्डभट्टः, सं. डा. आद्यप्रसादमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, वि. सं. २०४५
20. मीमांसा- शावरभाष्यम्, शवरस्वामी, युधिष्ठिरमीमांसकः रामलाल कपुर ट्रस्टम्, हरियाणा, वि. सं. २०४६
21. न्यायसूत्रम्- महर्षिगौतमः, सं. डा. नारायण मिश्रा, काशी संस्कृत ग्रंथमाला, 43